International Conference on Recent Developments in Science, Engineering, Management, and Humanities (ICRDSEMH -2023)
22nd October, 2023, Hyderabad, Telangana, India.

CERTIFICATE NO : ICRDSEMH /2023/C1023830

# निघण्टौ प्रयुक्तानां नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्

# A Review of The Morphological Meanings of The Word 'River' Read in Nighantu

**Munmun Misra**

Research Scholar, Department of Sanskrit, Mansarovar Global University, Sehore, M.P., India

**संक्षिप्तसारः** ***वेदोऽखिलो धर्ममूलम्*** ।* मन्त्रब्राह्मणात्मकः* सः वेदो न केवलं भारतीयवाङ्मयेष्वेव समादृतः, अपि तु विश्वसाहित्याकाशेऽपि स्वकीयया अप्रतिमप्रतिभया देदीप्यमानः सन् राराजते । ***इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः*** इति वेदभाष्यकार-सायणाचार्यराद्धान्तः ।* विश्वसाहित्ये सर्वतः प्राचीनतमो ग्रन्थः वेद एव ऐहिकामुष्मिकोभयविधश्रेयःसाधनस्य धर्मस्य तत्फलं दातुरीश्वरस्य च प्रकाशकः । मानवसंस्कृतेः प्राचीनतमं स्वरूपं विकासश्च वेदस्य परिशीलनेनैव निश्चेतुं शक्यते । समस्तेऽपि जगतीतले भारतस्य महती प्रतिष्ठा वेदमाश्रित्यैवास्ति । मानवजातेरितिवृत्तस्य आधुनिकभाषाविज्ञानस्य च स्वरूपं वेदाध्ययनेनैव परिशील्यते । इदमपि सत्यमतिरोहितमेवास्ति यद् शिक्षादिषडङ्गानां तथा षड्वेदाङ्गानां मौलिकानुशीलनं, पर्यालोचनं, मननं चान्तरेण वेदानां रहस्यं ज्ञातुमशक्यमेव । एतेषु शिक्षादिषु षड्वेदाङ्गेषु निरुक्तमेव वेदपुरुषस्य श्रोत्ररूपेण कल्पितम् । तदेव वेदस्य चतुर्थमङ्गम्ं आस्ते ।

भगवता यास्केन नैघण्टुक-नैगम-दैवतकाण्डरूपेण त्रिविधं काण्डं समाम्नातम् । तेषु त्रिविधेषु काण्डेषु निघण्टु एव वैदिककोषग्रन्थः । तत्र गौरादिदेवपत्न्यन्तशब्दाः निवेशिता इति दृश्यते । तेषामेव शब्दानां निर्वचनमस्माभिः निरुक्तग्रन्थे समुपलभ्यन्ते । निघण्टौ विविधप्रकारेषु शब्देषु नदीवाचकस्तु एक एव । तेषां नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणमेव गवेषणापत्रस्यास्य मूलविषयः एवेति ॥

**सूचीमुखशब्दाः : संक्षिप्तसारः, अवतरणिका, निघण्टु-शब्दस्यार्थः, निघण्टुस्थिताः नदीवाचकशब्दाः, निघण्टौ प्रयुक्तानां नदीवाचकशब्दानां रूपतत्त्वार्थसमीक्षणम्, उपसंहारः, शब्दसंक्षेपसूची, ग्रन्थपञ्जी**